दिनाङ्क :-04.11.2024

प्रात: - 06:55

**अथ वार्ताः**

**प्रधानमंत्री-झारखण्ड:**

प्रधानमंत्री वरिष्ठभाजपेति दलस्य नेता च नरेन्द्र मोदी अद्य झारखण्डे विधानसभानिर्वाचनाय भाजपानेतृत्वस्य राष्ट्रिय जनतांत्रिक गठबंधनस्य प्रत्याशीनां कृते समर्थनं अवाप्तये द्वे निर्वाचनसभे सम्बोधयिष्यति। झारखण्ड भाजपा अध्यक्षः पूर्वमुख्यमन्त्री च बाबूलाल मराण्डी उक्तवान् यत्, प्रधानमन्त्री गढवानगरे प्रथमां जनसभां प्रातः सार्धएकादशवादने सम्बोधयिष्यति, अपरं च अपराह्णे त्रिवादने चाईबासायां सम्बोधयिष्यति। राज्ये मतदानस्य सूचनायाः घोषणानन्तरं झारखण्डे प्रधानमन्त्रिणः मोदिनः प्रथमा निर्वाचनसभा भविष्यति। नवम्बरमासस्य त्रयोदश, विंशतिः दिनाङ्कयोः द्विचरणीयमतदानं राज्ये भविष्यति।

**इसा- विधानसभा**

अद्य नवदिल्ल्याः भारतमण्डपम् इत्यत्र अन्तर्राष्ट्रीयसौरगठबन्धनसभायाः सप्तमसत्रस्य उद्घाटनं भविष्यति। आईएसए सभा अन्तर्राष्ट्रीयसौरगठबन्धनस्य उपक्रमेषु विचारं करिष्यति ये ऊर्जापरिवेषणं, सुरक्षां, परम्परां च प्रभावितं कुर्वन्ति।

**महाराष्ट्र - प्रत्यावर्तनम्**

महाराष्ट्रे विधानसभानिर्वाचनार्थं नामाङ्कन प्रत्यावर्तनम् अद्य समाप्तिं यास्यति। प्राप्त सूचनानुसारं महायुतीतः प्रायः षड्त्रिंशत् प्रत्याशिनः, महाविकासअघाडीतः षड्विंशतिः प्रत्यशिनः च विद्रोह प्रदर्शनम् कुर्वन्ति। अभ्यर्थिनः परस्परं विरुद्धं नामाङ्कनं कृतवन्तः, अनेकेषु निर्वाचनक्षेत्रेषु मैत्रीपूर्णाः स्पर्धाः च सन्ति। निर्वाचनआयोगेन प्रकाशितस्य मतदातृणां सूचीयानुसारं पञ्च कोटीतोप्यधिकाः पुरुषाः

चत्वारि दशमलव पञ्च कोट्यावत् महिलाः च समाविष्टाः सन्ति। सप्ततिलक्षाधिक नवकोटितोप्यधिकाः जनाः निर्वाचने स्वस्य मताधिकारस्य प्रयोगं करिष्यन्ति।

## हरिद्वार गंगाउत्सवः

अद्य हरिद्वारे गंगाउत्सवस्य अष्टमसंस्कारणं आचर्यते, आध्यात्मिकनगरस्य चण्डीघाटे आयोजनस्य सज्जता क्रियते। गङ्गा-उत्सवस्य आयोजनं (एनएमसीजी) इति राष्ट्रिय-स्वच्छ-गंगा-मिशन इत्यनेन अद्य क्रियते, यस्य उद्देश्यं गंगा-नद्याः संरक्षणं प्रवर्धयितुं, तस्याः सांस्कृतिकं आध्यात्मिकं च महत्त्वं प्रकाशयितुं, स्वच्छतां प्रति जनसामान्यं प्रति जागरूकतां जनयितुं च वर्तते ।

## रेलवे - स्पेशल रेल

रेलमंत्रालयेन महोत्सवसमये यात्रिकाणां सौविध्याय विशेषव्यवस्थारूपेण दिल्लीतः देशस्य विभिन्नेषु भागेषु प्रायः विंशतिः विशेष-रेलयानानि चालयन्ति। तेषु दरभङ्गा, बरौनी, पटना, कटरा, मुजफ्फरपुर, बलिया, कामाख्या, आजमगढ चेत्येषां क्षेत्राणां कृते विशेषरेलयानानि सन्ति। विशेषतः छठपूजायाः कृते अस्य मासस्य द्वे दिनांकतः अष्ट दिनाङ्कपर्यन्तं पञ्चचत्वारिंशदधिकैकशतं अतिरिक्तरेलयानानि प्रचलन्ति। एवं प्रकारेण प्रतिदिनं प्रायः द्विलक्षाधिक अतिरिक्त यात्रिकाणां कृते रेलयात्रा सुलभा क्रियते। रेलमार्गेण अक्टोबर्-मासस्य प्रथमदिनात् नवम्बर्-मासस्य त्रिंशत् दिनाङ्कपर्यन्तं उत्सवेषु प्रायः सप्तसहस्राणि विशेषरेलयानानि व्यवस्थापितानि सन्ति।

## अश्विनी वैष्णव

केन्द्रीय सूचना-प्रसारण, रेल तथा प्रविधि मंत्री अश्विनी-वैष्णव: एकदिवसीयस्यां केरल - यात्रायां ह्यः कोच्चि-क्षेत्रं सम्प्राप्तवान्। स: रेल सम्बद्धं निर्माणं, अमृत-भारत-एक्सप्रेस-रेलयानं, स्टेशन इति रेलस्थात्र-विकास-परियोजनां निरीक्षितुं विशेषेण-रेलयानेन अलुवात: कोझिकोडं यावत् यात्रां विहितवान्।